श्री शिव रक्षा स्तोत्रं

श्री शिव रक्षा स्तोत्रं

अस्य श्री शिवरक्षास्तोत्रमंत्रस्य याज्ञवल्क्य ऋषिः | श्री सदाशिवो देवता | अनुष्टुप् छंदः | श्री सदाशिवप्रीत्यर्थं शिवरक्षास्तोत्रजपे विनियोगः ||

चरितं देवदेवस्य महादेवस्य पावनं |
अपारं परमोदारं चतुर्वर्गस्य साधनं || 1 ||

गौरीविनायकोपेतं पंचवक्त्रं त्रिनेत्रकं |
शिवं ध्यात्वा दशभुजं शिवरक्षां पठेन्नरः || 2 ||

गंगाधरः शिरः पातु फालमर्धेंदुशेखरः |
नयने मदनध्वंसी कर्णौ सर्पविभूषणः || 3 ||

घ्राणं पातु पुरारातिः मुखं पातु जगत्पतिः |
जिह्वां वागीश्वरः पातु कंधरां शितिकंधरः || 4 ||

श्रीकंठः पातु मे कंठं स्कंधौ विश्वधुरंधरः |
भुजौ भूभारसंहर्ता करौ पातु पिनाकधृक् || 5 ||

हृदयं शंकरः पातु जठरं गिरिजापतिः |
नाभिं मृत्युंजयः पातु कटिं व्याघ्राजिनांबरः || 6 ||

सक्थिनी पातु दीनार्तशरणागतवत्सलः |
ऊरू महेश्वरः पातु जानुनी जगदीश्वरः || 7 ||

जंघे पातु जगत्कर्ता गुल्फौ पातु गणाधिपः |
चरणौ करुणासिंधुः सर्वांगानि सदाशिवः || 8 ||

एतां शिवबलोपेतां रक्षां यः सुकृती पठेत् |
स भुक्त्वा सकलान् कामान् शिवसायुज्यमाप्नुयात् || 9 ||

ग्रहभूतपिशाचाद्याः त्रैलोक्ये विचरंति ये |
दूरादाशु पलायंते शिवनामाभिरक्षणात् || 10 ||

अभयंकरनामेदं कवचं पार्वतीपतेः |
भक्त्या बिभर्ति यः कंठे तस्य वश्यं जगत्त्रयं || 11 ||

इमां नारायणः स्वप्ने शिवरक्षां यथाऽदिशत् |
प्रातरुत्थाय योगींद्रो याज्ञवल्क्यः तथाऽलिखत् || 12 ||

इति श्रीयाज्ञवल्क्यप्रोक्तं शिवरक्षास्तोत्रं |